# श्रीनारदीयमहापुराणम्

# THE NĀRADĪYAMAHĀPURĀṆAM

राष्ट्रिय संस्कृत संस्थान

नई दिल्ली

खेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीनारदीयमहापुराणम्

# THE NĀRADĪYAMAHĀPURĀṆAM

देहलीस्थेन प्रो. डा. चारुदेवशास्त्रिणा प्रणीतया भूमिकया सनाथितम्

*नागशरणसिंहसम्पादितश्लोकानुक्रमण्या सहितं*


राष्ट्रिय-संस्कृत-संस्थानम्

५६-५७ इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली - ११००५८

# भूमिका

## पुराणानां कर्ता

अष्टादशपुराणानां कर्ता सत्यवती सुत इति प्रथते प्रवादः। सत्यवतीसुतश्च पाराशरिर्भगवान् व्यासः। एवं सत्यपि नैकत्रापि पुराणे स भगवान् साक्षाद्वक्ता। सर्वमर्थजातं तच्छिष्यो लोमहर्षणः सूत एव प्रवक्ति सौतिर्वा। स्वयं तु तिरस्करिण्या तिरस्कृत इव परोक्ष एवास्ते शुश्रूषावताम्। प्रकृतमपि पुराणं नैमिषारण्ये सत्रासीनाः शौनकादयो महर्षयः सूतमुखाच्छृण्वन्ति। इदं चेह विपरीतमुक्तम् —सिद्धाश्रमे संनिहितं सूतमुपश्लिष्य विनीतवत्तत उपशृण्वन्ति न तु सूतस्तान्नैमिषारण्यस्थानुपैति। किंहेतुकोऽयं व्यतिक्रम इत्यपि चिन्त्यम्।

## वामनब्रह्माण्डयोः पुराणयोर्व्यासकर्तृकताया अनङ्गीकारः

वामनपुराणमधिकृत्येहापूर्वमीरितम्। वामनं हि व्यासेन नारदतो गृहीतमित्युदितम्—पुलस्त्येन समाख्यातं नारदाय महात्मने, ततो नारदतः प्राप्तं व्यासेन सुमहात्मना। व्यासात्तु लब्धवांश्चैतत्तच्छिष्यो लोमहर्षणः। स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च। एवं परम्पराप्राप्तं पुराणं वामनं शुभम्। (पू० १०५। १७-१९)॥ अष्टादशं ह्येतद् ब्रह्माण्डाख्यं सर्वप्रथमं ब्रह्मणा वसिष्ठायोपदिष्टमितीह विस्पष्टमुक्तम्। वस्तुतो व्यासस्तूपदेष्टेत्यपि व्यक्तमुदितम्। मया चेदं पुराणं वसिष्ठाय पुरोदितम्। तेन शक्तिसुतायोक्तं जातुकर्ण्याय तेन च। व्यासो लब्ध्वा ततश्चैतत्प्रभञ्जनमुखोदितम्। प्रमाणीकृत्य लोकेस्मिन्प्रावर्तयदनुत्तमम् (पू० १० ९।३३-३४)॥ इति मूले स्थितम्। तेनास्य व्यासकर्तृकताऽपोहिता भवति। भूतार्थोऽयम् अर्थवादो वेत्यत्र पौराणिका निर्णयं निर्ब्रुवन्तु, न वयं विशिष्य वक्तुमीश्महे।

## पुराणान्यर्थवादप्रधानानि न

इह पुराणान्यर्थवादप्रधानानीति ग्रहीतॄणां गर्हा। तथा चाह—समस्तकर्मनिर्मूसाधनानि नराधमः। पुराणाम्यर्थवादेन ब्रुवन्नरकमश्नुते (पू० १।५८-५९)॥

## पुराणपौर्वापर्यम्

केन क्रमेण पुराणानां निर्मितिरभूदित्यत्रोपलभ्यते कियानपि सङ्केतः। मार्कण्डेयात्पुराणात्परेणास्य नारदीयस्य निर्माणमभूदित्यसंशयम्। मार्कण्डेय पुराणोक्तं चरितत्रितयं द्विज। पठनीयं नवदिनं भुक्तिमुक्ती अभीप्सता (पूर्व० ११०। ३२-३३) इत्यत्रोक्तेः। पूर्वं श्रीमद्भागवतं पाश्चात्यं स्कान्दम् इत्यपि निश्चप्रचम्। स्कान्दे वैष्णवखण्डे श्रीमद्भागवतस्य माहात्म्यस्यानुकीर्तनात्। तदिदं नारदीये पूर्वभागे (१०४।३९) विस्पष्टमुदीरितम्। ब्रह्मवैवर्तकं दशममित्यपि सन्देहानास्कन्नम्। शृणु वत्स प्रवक्ष्यामि पुराणं दशमं तव ब्रह्मवैवर्तकं नाम वेदभाग नुदर्शकम् (१०१।१)॥ इत्युक्तेः। ब्रह्माण्ड चाष्टादशमित्यपीह (१०९/३०) अनावृतम्। आदिश्च ब्राह्ममिति चाप्यभिव्यक्तम्। ब्राह्मं पुराणं तत्रादौ सर्वलोकहिताय वै। व्यासेन वेदविदुषा

॥ श्रीः ॥

# अथ श्रीनारदीयपुराणस्थितविषयानुक्रमणिका प्रारभ्यते ।

अध्यायाः । विषयाः ।


१ धर्मकामार्थमोक्षोपायान्वेदितुं शौनकादिभिः कृते प्रश्ने सूतस्य नारदाय सनकादिभिर्निरूपितपुराणस्य नारदीयस्य कथनोपन्यासे पुराणमाहात्म्यकथनम् ॥ श्लो० ७९ ॥

२ ब्रह्मसभामस्थितसनकादीनां गंगातीरे विष्णुप्रसादनोपायबोधनाय नारदप्रश्ने पुराणोपन्यासे विष्णुस्तुतिः ॥ श्लो० ५७ ॥

३ भगवद्विरचितसृष्टिनिरूपणप्रसंगेन भूगोलवर्णनभरतखंडोत्पत्तिप्राशस्त्यवर्णनम्॥ श्लो० ८३ ॥

४ हरिभक्तिनिरूपणे मृकंडुमुनेस्तपसा तोषितस्य भगवतोऽहं तव पुत्रत्वं यास्यामीतिमनोभीष्टवरप्रदानम् ॥ श्लो० ९९ ॥

५ मार्कंडेयस्य प्रलयदर्शनान्ते पुराणसंहितां निश्चय परंपदमेष्यसीति हरेर्वरवितरणम् ॥ श्लो० ८३ ॥

६ गंगायमुनयोः समागमात्प्रयागक्षेत्रप्रशंसापूर्वकं गंगामाहात्म्यकथनम् ॥ श्लो० ७० ॥

७ गंगामाहात्म्यप्रसंगेन रिपुजितस्य बाहुभूमिपतेरौर्वमुनेराश्रमसविधे मृतस्य गर्भवत्याः सहगमनोद्यतायाः प्रियपत्न्या मुनिकृतः सहगमननिषेधः ॥ श्लो० ७६ ॥

८ बाहुसुतसगरान्वयजातभगीरथनृपानीतगंगासंगमात् कपिलमहामुनिकोपानलदग्धतत्पूर्वजानां परमपदावलंबनम् ॥ श्लो० १३८ ॥

९ कुलगुरुवसिष्ठमहर्षिशापजन्यराक्षसदेहस्य सौदासनृपतेर्गंगोदकसंबन्धाच्छापमोचनम् ॥ श्लो० १४८ ॥

१० गंगोत्पत्तिप्रसंगेन देवासुरयुद्धे देवपराजयदुःखिताया हिमाद्रौ भगवदाराधनोद्यता या अदितेर्विनाशायोत्पादितेऽग्नौ दैत्यविनाशः ॥ श्लो० ५२ ॥

११ त्रैलोक्यराज्यमिंद्राय पुनः प्रदातुं गृहीतवामनावतारस्य बलियज्ञमास्थितस्य भगवतस्त्रिविक्रमस्य चरणतलाद्गंगोत्पत्तिः ॥ श्लो० ९७ ॥

१२ धर्माख्याने सत्पात्रब्राह्मणलक्षणं, महावने तडागबंधनात् वीरभद्रनृपतेरुत्तमलोकप्राप्तिरिति भगीरथाय धर्मराजद्विजनिवेदनञ्च ॥ श्लो० ९७ ॥

१३ देवतायतनवापीकूपतडागादिनिर्म्माणं, नानादानादिनिरूपणञ्च ॥ श्लो० १५३ ॥

१४ श्रुतिस्मृतिप्रतिपादितवर्णत्रयधर्मनिरूपणे पातकप्रायश्चित्तनिवेदनं, श्राद्धपक्षकथनञ्च ॥ श्लो० ९४ ॥

१५ पातकिनां पृथक्पृथङ्निरयपातनावर्णनपूर्वकं नृपपूर्वजानां नरकोद्धाराय धर्मराजद्विजस्य भूतले गंगानयनार्थं भगीरथायोद्योतनम् ॥ श्लो० १६९ ॥

१६ द्विजरूपिणो धर्मस्य वचनात्पितृपुरुद्धरणाय भूतले भगीरथस्य गङ्गानयनम्, निजकुलोद्धारश्च ॥ श्लो० ११६ ॥

१७ व्रताख्याने मार्गशीर्षं ारभ्य कार्तिकमासपर्यंतं सोद्यापनं शुक्लद्वादशीव्रतकथनम्॥ ॥ श्लो० ११३ ॥

१८ प्रतिमासं पौर्णिमायां सोद्यापनविधिलक्ष्मीनारायणव्रतम् ॥ श्लो० ३२ ॥

१९ कार्तिकस्य शुक्लपक्षे दशम्यां हरिमंदिरे ध्वजारोपणव्रतम् ॥ श्लो० ४७ ॥

यज्जलस्पर्शमात्रेण पावितं सागरं कुलम् ॥ गतं विष्णुपदं विप्र सर्वलोकोत्तमोत्तमम् ॥ २ ॥ आसीद्रविकुले जातो बाहुर्नाम वृकात्मजः ॥ बुभुजे पृथिवीं सर्वां धर्मतो धर्मतत्परः ॥ ३ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये च जन्तवः ॥ स्थापिताः स्वस्वधर्मेषु तेन बाहुर्विशांपतिः ॥ ४ ॥ अश्वमेधैरियाजासौ सप्तद्वीपेषु सप्तभिः ॥ अतर्पयद्भूमिदेवान् गोभूस्वर्णांशुकादिभिः ॥ ५ ॥ अशासन्नीतिशास्त्रेण यथेष्टं परिपन्थिनः ॥ मेने कृतार्थमात्मानमन्यातपनिवारणम् ॥ ६ ॥ चन्दनानि मनोज्ञानि बलिं यत्स्र[illegible] जनाः भूषिता भूषणैर्दिव्यैस्तद्राष्ट्रे सुखिनो मुने ॥ ७ ॥ अकृष्टपच्या पृथिवी फलपुष्पसमन्विता ॥ ८ ॥ ववर्ष भूमौ देवेन्द्रः काले काले मुनीश्वर ॥ अधर्मनिरतापाये प्रजा धर्मेण रक्षिताः ॥ ९ ॥ एकदा तस्य भूपस्य सर्वसंपद्विनाशकृत् ॥ अहंकारो महाञ्जज्ञे सा[illegible] लोपहेतुकः ॥ १० ॥ अहं राजा समस्तानां लोकानां पालको बली ॥ कर्ता महाक्रतूनां च मत्तः पूज्योऽस्ति कोऽपरः ॥ ११ ॥ अहं विचक्षणः श्रीमाञ्जिताः सर्वे मयारयः ॥ वेदवेदाङ्गतत्त्वज्ञो नीतिशास्त्रविशारदः ॥ १२ ॥ अजेयोऽव्याहतैश्वर्यो मत्तः कोऽन्योऽधिको भुवि ॥ अहंकारपरस्यैवं जातासूया परेष्वपि ॥ १३ ॥ असूयातोऽभवत्कामस्तस्य राज्ञो मुनीश्वर ॥ एषु स्थितेषु तु नरो विनाशं यात्यसंशयम् ॥ १४ ॥ यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ॥ एकैकमप्यनर्थाय किमु यत्र चत[illegible]म् ॥ १५ ॥ तस्यासूया तु महती जाता लोकविरोधिनी ॥ स्वदेहनाशिनी विप्र सर्वसंपद्विनाशिनी ॥ १६ ॥ असूयाविष्टमनसि यदि संपत्प्रव[illegible] ॥ तुषाग्नि वायुसंयोगमिव जानीहि सुव्रत ॥ १७ ॥ असूयोपेतमनसां दम्भाचारवतां तथा ॥ परुषोक्तिरतानां च सुखं नेह परत्र च ॥ १८ ॥ असूयाविष्टचित्तानां सदा निष्ठुरभाषिणाम् ॥ प्रिया वा तनया वापि बान्धवा अप्यरातयः ॥ १९ ॥ मनोभिलाषं कुरुते यः समीक्ष्य परश्रियम् ॥ स स्वसंपद्विनाशाय कुठारो नात्र संशयः ॥ २० ॥ यः स्वश्रेयोविनाशाय कुर्याद्यत्नं नरो मुने ॥ सर्वेषां श्रेयसं दृष्ट्वा स कुर्यान्मत्सरं कुधीः ॥ २१ ॥ मित्रापत्यगृहक्षेत्रधनधान्यपशुष्वपि ॥ हानिमिच्छन्नरः कुर्यादसूयां सततं द्विज ॥ २२ ॥ अथ तस्याविनीतस्य ह्यसूयाविष्टचेतसः ॥ हैहयास्तालजंघाश्च बलिनोऽरातयोऽभवन् ॥ २३ ॥ यस्यानुकूलो लक्ष्मीशः सौभाग्यं तस्य वर्द्धते ॥ स एव विमुखो यस्य सौभाग्यं तस्य हीयते ॥ २४ ॥ तावत्पुत्राश्च पौत्राश्च धनधान्यगृहादयः ॥ यावदीक्षेत लक्ष्मीशः कृपापाङ्गेन नारद ॥ २५ ॥ अपि मूर्खान्धबधिरजडाः शूरा विवेकिनः ॥ श्लाघ्या भवन्ति विप्रेन्द्र प्रेक्षिता माधवेन ये ॥ २६ ॥ सौभाग्यं तस्य हीयेत यस्यासूयादिलाञ्छनम् ॥ जायते नात्र संदेहो जन्तुद्वेषो विशेषतः ॥ २७ ॥ सततं यस्य कस्यापि यो द्वेषं कुरुते नरः ॥ तस्य सर्वाणि नश्यन्ति श्रेयांसि मुनिसत्तम ॥ २८ ॥ असूया वर्द्धते यस्य तस्य विष्णुः पराङ्मुखः ॥ धनं धान्यं

स्थितम् ॥ विद्धि तच्छून्यकं नाम प्राणायामं यथास्थितम् ॥ २६ ॥ शनैःशनैर्विजेतव्यःप्राणो मत्तगजेन्द्रवत् ॥ अन्यथा खलु जायन्ते महा
रोगा भयंकराः॥२७॥क्रमेण योजयेद्वायुं योगी विगतकल्मषः ॥ स सर्वपापनिर्मुक्तो ब्रह्मणः पदमाप्नुयात् ॥ २८ ॥ विषयेषु प्रसक्तानि चेन्द्रियाणि
मुनीश्वरः॥समाहृत्य निगृह्णाति प्रत्याहारस्तु स स्मृतः॥२९॥जितेन्द्रिया महात्मानो ध्यानशून्या अपि द्विज॥ प्रयान्ति परमं ब्रह्म पुनरावृत्तिदुर्लभम्
॥ ३० ॥ अनिर्जितेंद्रियग्रामं यस्तु ध्यानपरो भवेत् ॥ मूढात्मानं च तं विद्याद्ध्यानं चास्य न सिध्यति॥३१॥यद्यत्पश्यति तत्सर्वं पश्येदात्मवदा
त्मनि ॥ प्रत्याहृतानीन्द्रियाणि धारयेत्सा तु धारणा ॥ ३२ ॥ योगाज्जितेंद्रियग्रामस्तानि हृत्वा दृढं हृदि ॥ आत्मानं परमं ध्यायेत्सर्वधातारमच्यु
तम् ॥ ३३ ॥ सर्वविश्वात्मकं विष्णुं सर्वलोकैककारणम्॥विकसत्पद्मपत्राक्षं चारुकुण्डलभूषितम् ॥ ३४ ॥ दीर्घबाहुमुदाराङ्गं सर्वालङ्कारभूषितम् ॥
पीताम्बरधरं देवं हेमयज्ञोपवीतिनम् ॥ ३५ ॥ बिभ्रतं तुलसीमालां कौस्तुभेन विराजितम् ॥ श्रीवत्सवक्षसं देवं सुरासुरनमस्कृतम् ॥ ३६ ॥
अष्टारे हृत्सरोजे तु द्वादशांगुलविस्तृते ॥ ध्यायेदात्मानमव्यक्तं परात्परतरं विभुम् ॥ ३७ ॥ ध्यानं सद्भिर्निगदितं प्रत्ययस्यैकतानता ॥
ध्यानं कृत्वा मुहूर्त्तं वा परं मोक्षं लभेन्नरः ॥ ३८ ॥ ध्यानात्पापानि नश्यन्ति ध्यानान्मोक्षं च विंदति ॥ ध्यानात्प्रसीदति हरिर्ध्यानात्सर्वार्थसाध
नम् ॥ ३९ ॥ यद्यद्रूपं महाविष्णोस्तत्तद्ध्यायेत्समाहितम् ॥ तेन ध्यानेन तुष्टात्मा हरिर्मोक्षं ददाति वै ॥४०॥ अचञ्चलं मनः कुर्याद्ध्येये वस्तुनि
सत्तम ॥ ध्यानं ध्येयं ध्यातृभावं यथा नश्यति निर्भरम् ॥ ४१ ॥ ततोऽमृतत्वं भवति ज्ञानामृतनिषेवणात् ॥ भवेन्निरन्तरं ध्यानादभेदप्रति
पादनम् ॥ ४२ ॥ सुषुप्तिवत्परानन्दयुक्तश्चोपरतेन्द्रियः ॥ निर्वातदीपवत्संस्थः समाधिरभिधीयते ॥ ४३ ॥ योगी समाध्यवस्थायां न शृणोति न
पश्यति ॥ न जिघ्रति न स्पृशति न किंचिद्वक्ति सत्तम॥ ४४ ॥ आत्मा तु निर्मलः शुद्धः सच्चिदानन्दविग्रहः ॥सर्वोपाधिविनिर्मुक्तो योगिनां भात्य
चञ्चलः ॥ ४५ ॥ निर्गुणोऽपि परो देवो ह्यज्ञानाद्गुणवानिव ॥ विभात्यज्ञाननाशे तु यथापूर्वं व्यवस्थितम् ॥ ४६ ॥ परं ज्योतिरमेयात्मा मायावा
निव मायिनाम् ॥ तन्नाशे निर्मलं ब्रह्म प्रकाशयति पंडित ॥४७॥ एकमेवाद्वितीयं च परं ज्योतिर्निरंजनम्॥सर्वेषामेव भूतानामंतर्यामितया स्थितम्
॥ ४८ ॥ अणोरणीयान्महतो महीयान्सनातनात्माखिलविश्वहेतुः ॥ पश्यंति यज्ज्ञानविदां वरिष्ठाः परात्परस्मात्परमं पवित्रम् ॥ ४९ ॥
अकारादिक्षकारांतवर्णभेदव्यवस्थितः ॥ पुराणपुरुषोऽनादिः शब्दब्रह्मेति गीयते ॥ ५० ॥ विशुद्धमक्षरं नित्यं पूर्णमाकाशमध्यगम् ॥ आनन्दं निर्मल
शांतं परं ब्रह्मेति गीयते ॥ ५१ ॥ योगिनो हृदि पश्यन्ति परात्मानं सनातनम्॥अविकारमजं शुद्धं परं ब्रह्मेति गीयते ॥ ५२॥ ध्यानमन्यत्प्रवक्ष्यामि